देवा अभजन्त दक्षिणां पितरः प्रतीचीं मनुष्याः उदीचीमसुराः अपरेषामुदीचीं मनुष्याः। विष्णुपुराणे॥

"प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत् पृथक्।"

इत्याह्निकाचारतत्त्वम्॥

सनपर्णी, स्त्री, (सनस्य पर्णमिव पर्णमस्याः। पाककर्णेति ङीष्।) अश्मपर्णी। इति शब्दरत्नावली॥

सनसूत्रं, क्ली, (सनस्य सूत्रम्।) पवित्रकम्। हे शणसूत्रजाले। शणस्य सूत्रं शणसूत्रं शणति ददाति सूत्रं शणः। शण अन्न दाने अन् शण-त्वालव्यादिमूर्द्धन्यणान्तः। इति बहवः। सनो दन्त्यसादिर्दन्त्यनान्तः। इति केचित्। तन्मते षन दु ञ दाने इत्यस्य रूपम्। शणो दन्त्य-सादिर्मूर्द्धन्यणान्त इत्यपरे। शण गिण मणि काकण कोण काणा इति मूर्द्धन्यणान्ते विद्या-भरणः।

"कार्पासमुपवीतं स्यात् विप्रस्योर्द्ध्वहृतं त्रिवृत्।

शनसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥"

इति मनुवचनात् पवित्रकमपि तदुच्यते। इत्य-मरटीकायां भरतः॥

सना, व्य, नित्यम्। इत्यमरः॥ (यथा, ऋग्वेदे। ३।५४।८।

"सना पुराणमध्येम्यारात्॥")

सनात्, व्य, नित्यम्। इत्यमरटीकायां रामाश्रमः॥ (चिरात्। यथा, ऋग्वेदे। ४।२०।६।

"सनादेव सहसे जात उग्रः॥"

"सनादेव चिरादेव जात उत्पन्नः॥" इति तद्भाष्ये सायणः॥) विष्णुः। इति तस्य सहस्रनामस्तोत्रम्॥

सनातन, पुं, (सना भवः। "सायंचिरंप्राह्णे प्रगे इति।" ४।३।२३। इति ट्यु ट्युलौ तुट् च।) विष्णुः। शिवः। ब्रह्मा। पितृणामतिथिः। इति हेमचन्द्रः॥ दिव्यमनुष्यः। अस्य प्रमाणं सनन्दशब्दे द्रष्टव्यम्। स च ब्रह्मणः पुत्रः। यथा,—

"सनत्कुमारो धर्मश्च सनकश्च सनातनः।

सनन्दश्चापि सूर्य्यश्च येऽन्ये वा ब्रह्मणः सुताः॥

विचक्षणा न यद्दृष्टं के वान्ये जडबुद्धयः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३१ अध्यायः॥

स तु जनलोकवासी। इति काशीखण्डम्॥ वह्निपुराणमते तु तपोलोकस्थ इति भेदः। वैष्णवराजः। इति मत्स्यपुराणम्॥

सनातनः, त्रि, (सनाभवः। सायंचिरमिति ट्यु ट्युलौ तुट् च।) नित्यम्। इत्यमरः॥ सुनिश्चलः। इति विश्वः॥ (यथा, मनुः। ७।९८।

"एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः।

अस्माद्धर्मान्न च्यवेत क्षत्त्रियो घ्नन् रणे रिपून्॥")

सनातनतरः, पुं, (अयमेषामतिशयेन सनातनः। तमप्।) विष्णुः। इति महाभारते तस्य सहस्रनामस्तोत्रे। १३।१४९।१०९॥

सनातनी, स्त्री, (सनतन+टित्वात् ङीप्।) दुर्गा। लक्ष्मीः। सरस्वती। इति शब्दरत्नावली॥ तस्या व्युत्पत्तिर्यथा,—

"सर्व्वकाले सना प्रोक्ता विद्यमाने तनोति च।

सर्व्वत्र सर्व्वकालेषु विद्यमाना सनातनी॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः॥ अपि च,

"निर्गुणस्य च नित्यस्य वाचकश्च सनातनः।

सदा नित्या निर्गुणा या कीर्त्तिता सा सनातनी॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २७ अध्यायः॥ अन्यच्च।

"क्षितिं करोति भूतानां सैव काले सनातनी।"

इति देवीमाहात्म्यम्॥

सनाथा, स्त्री, (नाथेन सह वर्त्तमाना।) जीवद्भर्त्तृका। इति जटाधरः॥ (प्रभुविशिष्टे, त्रि। यथा, भागवते। १।११।८।

"अहो सनाथा भवता स्म यद्वयं

त्रैपिष्टपानामपि दूरदर्शनम्।

प्रेमस्मितस्निग्धनिरीक्षणाननं

पश्येम रूपं तव सर्व्वसौभगम्॥")

सनाभिः, पुं, (समानो नाभिर्गोत्रमस्य। "ज्योतिर्जनपदेति।" ६।३।८५। इति समानस्य सः।) सपिण्डः। ज्ञातिः। इत्यमरमेदिनीकरौ॥ (यथा, मनुः। ५।७२।

"यथोक्तेनैव कल्पेन शुध्यन्ति तु सनाभयः॥")

सनाभिः, त्रि, (समानो नाभिर्यस्येति। समानस्य सः।) तुल्यः। इति मेदिनी॥ स्नेहयुक्तः। इति शब्दरत्नावली॥

सनामकः, पुं, शोभाञ्जनः। इति शब्दचन्द्रिका॥ (समानं नाम यस्य।) समाननामयुक्ते, त्रि॥ (यथा, हरिवंशे। ३१।१४।

"स तासु जनयामास पुत्रिकासु सनामकान्।

दश पुत्रान् महाभागो तपस्युग्रे रतान् सदा॥")

सनिः, पुं, (सन+"खनिकष्यज्योति।" उणा० ४।१३९। इति इः।) पूजा। दानम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। १।१००।१३।

"तं सचन्ते सनयस्तं धनानि॥"

"सनयो धनस्य दानानि सचन्ते सेवन्ते।" इति तद्भाष्ये सायणः॥)

सनिः, पुं, स्त्री, (सन+"खनिकष्यज्योति।" उणा० ४।१३९। इति इः।) अर्थ्यमना। इत्यमरः॥ गुर्व्वादेः सत्कारपूर्व्वकं क्वचिदर्थे नियोजनम्। तच्च हे गुरो अस्माकं कर्म्म कुर्व्वित्यादिरूपम्। सायते दीयते पुण्यादिकमत्र सनिः षन दु ञ दाने नाम्नीति इः पाच्छोणादीति ईपि सनी च। अन्वेषणादिवदर्थ्यमना। इति भरतः॥ दिक्। इति शब्दमाला॥

सनितः, त्रि, प्रतिपन्नः। इति हेमचन्द्रः॥

सनिष्ठीवं, क्ली, (निष्ठीवेन सह वर्त्तमानम्।) सनिष्ठेवम्। इत्यमरटीकायां भरतः॥

सनिष्ठेवं, क्ली, अस्पष्टवचनम्। इत्यमरः॥ निष्ठेवो मुखवारिबिन्दुः तेन सह वर्त्तते इति सनिष्ठेवं निपूर्व्व ष्ठिवेर्घञ् गुणः सनिष्ठीवमिति क्वचित् पाठो लिपिकरप्रमादादिति मुकुटः। इत्यमर-टीकायां भरतः॥

सनी, स्त्री, (सन+इः। वा ङीष्।) सनिः। इत्यमरटीकायां भरतः॥ हस्तिकर्णस्फालः। इति शब्दरत्नावली॥

सनीडः, त्रि, (नीडेन वासस्थानेन सह वर्त्तमानः।) निकटः। इत्यमरः॥ (यथा, भट्टिः। ५।३१।

"सम्पत्य तत्सनीडेऽसौ तं हत्वात्मसमग्रिसवत्॥")

नीडयुक्तश्च॥

सन्तः, पुं, संहतलः। इति शब्दचन्द्रिका॥ सच्छब्दस्य प्रथमाबहुवचनान्तरूपञ्च॥ (यथा, रघुः। १।१०।

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥")

सन्ततं, क्ली, (सम्+तन+क्तः। समो वा हित-ततयोः इति पक्षे मलोपाभावः।) सततम्। तद्वति, त्रि। इत्यमरः॥

सन्तताभ्यासः, पुं, (सन्ततं यथा तथा अभ्यासः।) निरन्तराभ्यासः। यथा। स्वाध्यायः सन्तता-भ्यासः। इति भूरिप्रयोगः॥

सन्ततिः, स्त्री, (सम्+तन+क्तिन्।) गोत्रम्। इत्यमरः॥ (यथा, रघुः। १।६९।

"सन्ततिः शुद्धवंश्याहि परत्रेह च शर्म्मणे॥")

पंक्तिः। (यथा, कथासरित्सागरे। ११।५१।

"तत् श्रुत्वा नेत्रयुगलात् सरागादश्रुसन्ततिम्।

हृदयाद्धीरताञ्चापि समं कन्या मुमोच सा॥")

विस्तारः। (यथा, भागवते। १।४।१९।

"व्यदधात् यज्ञसन्तत्यै वेदमेकं चतुर्व्विधम्॥")

परम्पराभवः। पुत्त्रः। कन्या। इति विश्वः॥ (यथा, स्मृतिः।

"सन्तत्या पिण्डदानन्तु शोधयित्वा परिव्रजेत्॥")

सन्तप्तः, त्रि, (सम्+तप+क्तः।) अध्वगमनादिना श्रान्तः। तत्पर्य्यायः। सन्तापितः २ धूपितः ३ धूपायितः ४ दूनः ५। इत्यमरः॥ तप्तः ६। इति शब्दरत्नावली॥ अग्निजतापयुक्तः। यथा,—

"आदित्यदादीप्तसभानुकल्पं

सिंहासनं तस्य सपादपीठम्।

सन्तप्तचामीकरवल्गुवर्ण्णं

विभागविन्यस्तमहार्हवरत्नम्॥"

इति भट्टिकाव्ये ३ सर्गः॥

सन्तमसं, क्ली, (समन्तात् तमः। "अवसमन्धेभ्यस्तमसः।" ५।४।७९। इति अच्।) विश्वक्-तमः। व्यापकान्धकारः। इत्यमरः॥ (यथा, माघे। ९।२२।

"अवधार्य्य कार्य्यगुरुतामभव-

न्न भयाय सान्द्रतमसन्तमसम्॥")

मोहः। यथा,—